॥ ओ३म् ॥
सर्वथा नैतदाश्चर्यं यत्त्वं
हरिगणेश्वर
न विस्मरसि सुस्निग्धम् उपकारं
कृतं शुभम्
किष्कि. का. -32/10

लौकिकानां हि साधूनामर्थं
वागनुवर्तते ।
ऋषीणां पुनराद्यानां
वाचमर्थोऽनुधावति ॥
उत्तररामचरितम् ।(सौन्दरनन्द - 9/33)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

Posting Date.: 4-5, 19-20 of Every Month

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
य आध्राय चकमानाय पित्वो-
अन्नवान्त्सन् रफितायोपजग्मुषे ।
स्थिरं मनः कृणुते सेवते पुरोतो चित्स
मर्डितारं न विन्दते ॥
(ऋग्वेद - 10/117/2)

'न तच्छस्त्रैर्न नागेन्द्रैर्न ह्यैर्न
पदातिभिः।
कार्यं संसिद्धिमभ्येति
यथा बुद्ध्या प्रसाधितम्।' (पंचतंत्र)

卐 वर्षम्-१३ 卐 अंकः-२० (३०८) नवदेहली 卐 १६ अप्रैलमासः २०२४तः ३० अप्रैलमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८



## सनातनधर्मस्य राष्ट्रधर्मस्य च प्रेरणां जागरयितुं सर्वतः महान् आदर्शः छत्रपतिशिवाजिमहाराजः- स्वामी रामदेवः

हरिद्वारम् ।"छत्रपतिशिवाजिमहाराज कथास्य" पञ्चम दिने पूज्य स्वामीगोविन्ददेवगिरिः उक्तवान् यत् भगवद्गीतासंवादः, अतः एव भगवद्गीतायाः मंथने वास्तविकरूपेण आनंदः आयाति। तेनोक्तं यत् वेदे



वाण्याः महती महिमा विद्यते। तदाधारेण राष्ट्रं जागरणीयम्। स्वामीगोविन्ददेवः अकथयत् यत् महाभारते स्पष्ट रूपेण कथितं यत् उत्तम राज्यं तदेव यत्र सज्जनाः निर्भयतया विचरणं कुर्युः।

स्वामीरामदेवः शिवाजेः चरित्रं, व्यक्तित्वं साधनां प्रति पूर्णदेशाय गौरवम्। शेषभागःद्वितीयेपुटे







## आधुनिक-परिप्रेक्ष्ये प्राचीन-भारतीय-साहित्ये विज्ञान-प्रौद्योगिकी विषये त्रिदिवसीयम् अंताराष्ट्रियं सम्मेलनं संपन्नम्

दिल्ली /उड़ीसा (अजयकुमारमिश्रा)

देशस्य विविध संस्कृतविश्वविद्यालयानां कुलपतीन् अतिरिच्यापि अनेके शिक्षाविदः छात्रच्छात्राश्चापि उपस्थिताः। उड़ीसाकेंद्रीयविश्वविद्यालये आयोजितस्य अद्यतन-उद्घाटनस्य अवसरे कुलपतिः प्रो. चक्रधर



त्रिपाठी मंचस्थान् अन्यान् विदुषः स्वागतीकृतवान्। एषु विशिष्ट अतिथिषु प्रो श्रीनिवासवरखेड़ी, कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली, प्रो जीएसआर कृष्णमूर्तिः, कुलपतिः, राष्ट्रियसंस्कृत विश्वविद्यालय, तिरूपतिः प्रो हरेरामत्रिपाठी, कुलपतिः, कविकुलगुरुकालिदास संस्कृत विश्वविद्यालयः, रामटेकः, वी.सी.झा, परामर्शकः, अकादमिक, ओडिशा केंद्रीय विश्वविद्यालयः, विश्वविद्यालयष्य प्रभारी लेखाकारः, वित्त अधिकारी नरसिंह चरण पांडा च समुपस्थिताः। संगोष्ठी संयोजक नरसिंह चरण पाण्डा स्वागत भाषणमकरोत्। कुलपतिः प्रो. चक्रधर त्रिपाठी सम्मेलनस्य महत्त्वे प्रकाशयन् आयोजन प्रासांगिकतां स्पष्टं कुर्वन्नभाषत एषा संगोष्ठी समयापेक्षिता वर्तते। शिक्षाविद् संगणकसंस्कृतस्य लब्ध प्रतिष्ठः विद्वान् कुलपतिः प्रो. श्रीनिवास वरखेड़ी तथ्ये बलं ददुक्तवान् यत् संस्कृतस्य उपादेयता न केवल साहित्य क्षेत्रे, अपितु विज्ञाने प्रौद्योगिकीविषयेऽपि वैश्विक स्तरः विद्यते। यत्र लिखितं ज्ञान विज्ञानं विश्व मानव कल्याणाय आधिक्येन उपयोगी भविष्यति प्रो कृष्णमूर्तिः स्वीय भाषणे राष्ट्रे समग्र साहित्य विकासाय संस्कृत भाषा साहित्यं च महनीयतया दृष्ट्या द्रष्टव्यम्।

दर्शनशास्त्रस्य प्रख्यात विद्वान् प्रो हरेराम त्रिपाठी कथितवान् संस्कृतं मानव कल्याणे अत्यंतम् उपयोगी एवं सहायकं वर्तते। प्रो पांडा भारतीय पारंपरिक ज्ञान प्रणाली विकासे ध्यान केंद्रितमकरोत्। कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, बिहारस्य कुलपतिः प्रो लक्ष्मीनिवास पाण्डेयः अपि महत्त्वपूर्ण विचारान् उपस्थापितवान्। संस्कृत संकाय सदस्यः डा बीरेंद्र सारंगी धन्यवाद ज्ञापनम् अकरोत्।

## नवसंवत्सरसमारोहः

भोपाल। भारतसर्वकारस्य शिक्षामन्त्रालयेन सञ्चालिते केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे अप्रैलमासस्य नवमे दिनाङ्के युगादिमहोत्सवस्याऽनुष्ठानमभवत्। समारोहोऽयं चौत्रशुक्लपक्षप्रतिपदातिथौ नववर्षस्य शुभारम्भोपलक्ष्ये कुलपतीनां प्रो.श्रीनिवासवरखेडी महोदयानामाध्यक्षे, अस्यैव विश्वविद्यालयस्य कुलपतिचराणां प्रो. राधावल्लभत्रिपाठिवर्याणां सारस्वतातिथित्वे, श्रृङ्गेरिपरिसरस्य निदेशकमहोदयानां प्रो.



हंसधरझामहोदयानां सम्मानितातिथित्वे, परिसरनिदेशकमहोदयानां संयोजकत्वे, तथा च परिसरीयाणां समेषामध्यापकानां कर्मचारिणां छात्राणाञ्चोपस्थितौ च प्रातः सार्धदशवादनतः परिसरस्य सभागारे प्रारम्भो जातः। तत्र अतिथीनां स्वागताऽनन्तरं सर्वप्रथमं भोपालपरिसरेण प्रकाशितस्य भोजराजपञ्चाङ्गस्य वाचनं जातम्। तदन्तरं मुख्यातिथिभिः प्रो. त्रिपाठिवर्य्यैः नूतनवर्षस्य शुभाऽशंसां प्रददन् सखण्डाऽखण्डयोर्भेदात् कालस्य द्वैविध्यं प्रतिपादितम्। संक्रान्तौ एकस्मात् राशेः अपरराशौ सूर्यगमने सति राशेः कः प्रभावो भवतीति प्रतिपादितवन्तः झा महोदयाः। निखिलेऽपि वर्षे नवसम्वतसरजन्यफलस्य तत्तद्राशिषु उत्पन्नानां जनानामुपरि किं फलं भवतीति निरूपितम्, लखनऊपरिसरस्य निदेशकैः प्रो. सर्वनारायणझामहोदयैः । तथैवाऽवसरेस्मिन् विश्वविद्यालस्य ज्योतिषविभागाऽध्यक्षैः प्रो. ईश्वरभट्टमहोदयैः सम्पूर्णे वर्षे द्वादशराशिषु नूतनसम्वत्सरस्य किं फलमिति उपस्थापितम्। ग्रहणकाले कर्तव्याऽकर्तव्ययोः विवेचनम् जनानामुपरि कीदृशः दुःष्प्रभावो भवतीति देवप्रयागपरिसरस्य निदेशकाः प्रो. पी.वी.सुब्रह्मण्यम्, प्रतिपादितवन्तः। भोपालपरिसरस्य ज्योतिषप्राध्यापकाः डॉ अनिलकुमारमहोदयाः वर्षपर्वाणां कृत्यं महतारम्भेणोपस्थापितन्तः। स्वीये आध्यक्षीयोद्बोधने कुलपतिवर्य्यैः प्रो. श्रीनिवासवरखेडी महोदयैः ज्योतिषशास्त्रे कृता कालगणना स्वजीवनव्यवहारे स्वीकर्तव्येति विहितम्। कार्यक्रमेऽस्मिन् समेषामतिथिनां वाचिकं स्वागतं परिसरनिदेशकेन प्रो. रमाकान्तपाण्डेयेन विहितम्। सञ्चालनम् ज्योतिषविद्याशाखायाः अध्यापकः भूपेन्द्र पाण्डेयमहोदयेन कृतम्। अन्ते धन्यवादज्ञापनं जयपुरपरिसरस्य निदेशकेन प्रो. सुदेशकुमारशर्मामहोदयेनाऽनुष्ठितम्।

# 'सरलमानकसंस्कृतम्' इति विषये राष्ट्रियकार्यशाला सम्पन्ना

(वार्ताहरः- प्रवेशकुमारशुक्लः , लक्ष्मणपुर)

भारतसर्वकारस्य भारतीयभाषासमितिः, उत्तरप्रदेशस्थकेन्द्रीयसंस्कृत विश्वविद्यालयस्य, लखनऊपरिसरः चेत्यनयोः संयुक्ततत्वावधानेन दिनाङ्कः १२/०२/२०२४ दिनाङ्के श्सरलमानकसंस्कृतम्' इति विषये एकदिवसीयराष्ट्रियकार्यशालायाः आयोजनं कृतम। अस्य कार्यक्रमस्य आयोजनं केन्द्रीयसंस्कृतविश्वविद्यालये, लखनऊपरिसरे, लखनऊ(उत्तरप्रदेशे) प्रातः १०:०० वादनतः सायं ०५:०० वादनपर्यन्तं पञ्चसत्रेषु आयोजितमासीत्।

अस्यां कार्यशालायां विविधाः विद्वांसः कुशलतया सरलमानकसंस्कृतं संक्षिप्तरूपेण प्रस्तुतवन्तः।



कार्यशालायाः अध्यक्षतां कुर्वन् केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य माननीयनिदेशकेन प्रो.सर्वनारायणझामहोदयेन कथितं यत् शास्त्रेषु उक्ताः विषयाः सरलसंस्कृतेन व्यक्ताः भवेयुः। येन छात्राः लाभं प्राप्स्यन्ति।

प्रथमसत्रे 'किमर्थं सरलमानकसंस्कृतम्' इति विषये (ओडिशाराज्यस्य) केन्द्रीयसंस्कृतविश्वविद्यालयस्थश्रीसदाशिव परिसरस्य शिक्षाशास्त्र विद्याशाखायाः आचार्याः प्रो. रमाकान्तमिश्रमहोदयाः स्वीयभाषणे सरलमानकशाब्दिकप्रयोगस्य आवश्यकता सन्दर्भे प्रतिपादितवन्तः।

द्वितीयसत्रे 'किमर्थं सरलमानकसंस्कृतम्' इति विषये उत्तरप्रदेशस्थलखनऊविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागस्य पूर्वविभागप्रमुखाः प्रो.ओमप्रकाशपाण्डेयमहोदयाः स्वमतं सरलरूपेण प्रकटितवन्तः।

तृतीयसत्रे उत्तरप्रदेशस्य कानपुरस्थविक्रमजीतसिंहसनातनधर्ममहाविद्यालयस्य प्राचार्याः डॉ. नवलतामहोदयाः 'सरल-मानक-संस्कृतस्य स्वरूपम्' इति विषये स्वस्य बहुमूल्यं वक्तव्यं प्रस्तुतवत्यः।

चतुर्थसत्रे उत्तरप्रदेशस्थलखनऊविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वविभागप्रमुखाः प्रो. रामसुमेरयादवमहोदयाः 'सरलमानकसंस्कृतेन प्रौढसंस्कृतस्य परिवर्तनस्याभ्यासः' इति विषये स्वमतं प्रकटयन् काव्यपरिपक्वतायाः सरलीकरणाय, व्याकरणस्य प्रयोगाय च स्वमतं प्रकटितवन्तः।

पञ्चमसत्रे उत्तरप्रदेशस्थ लखनऊविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागस्य सहायकाचार्याः डॉ.सत्यकेतुमहोदयाः 'सरलमानकसंस्कृतस्य क्रियान्वयनम्' इति विषये व्याख्यानं प्रस्तुतवान्। वैदिकवाङ्मयात् आरभ्य प्राविधिकक्षेत्रं यावत् सर्वे अंशाः कथं सरलसंस्कृतेन व्याख्यातुं शक्यते। इत्यस्मिन् सन्दर्भे चर्चां कृतवन्तः। डॉ.प्रफुल्लगडपालमहोदयानां संयोजनया डॉ. रुद्रनारायणनरसिंहमिश्रमहोदयानां सहसंयोजनया च कार्यक्रमोऽयं अनुष्ठितः। कार्यशालायां प्रायः १७० छात्राः भागं गृहीत्वा लाभान्विताः अभवन्।

# गृहे गृहे संस्कृतद्वारा प्रारब्धा सरलसंस्कृतभाषाशिक्षण कक्षा-मुकेशपाठकः

लखनऊ - अद्य निदेशकः विनयश्रीवास्तवः उत्तरप्रदेशसंस्कृतसंस्था लखनऊद्वारा चालितस्य गृहे गृहे संस्कृतयोजनायाः अन्तर्गतं एप्रिलमासस्य द्वादशदिवसीयसंस्कृतशिक्षणकेन्द्रस्य उद्घाटनं



कृतवान्। सः स्वभाषणेन सर्वान् आचार्यान् बोधयति स्म।

वरिष्ठप्रशासनिकपदाधिकारी डॉ. दिनेशमिश्रः अवदत् यत् एषा संस्थायाः प्राथमिकयोजना अस्ति। या मण्डलस्तरस्य संचालनं कृत्वा सम्पूर्णे राज्ये संस्कृतस्य प्रचारं कुर्वन् अस्ति।

प्रशासनिकपदाधिकारी डॉ. जगदानन्द झाः उक्तवान् यत् आकर्षकरूपेण संस्कृतस्य अध्यापनेन छात्राणां मध्ये रुचिः उत्पद्यते। फलतः छात्राः संस्कृतकक्षासु उत्साहेन भागं गृह्णन्ति। उद्घाटनसत्रे प्राचार्यसहिताः सर्वे शिक्षकाः छात्राः च उपस्थिताः आसन। संस्थायाः शिक्षकः मुकेशपाठकः अस्य केन्द्रस्य संचालनं कृतवान् । अस्मिन् अवसरे विद्यालयस्य कर्मचारी छात्राः च उपस्थिताः आसन्।

प्रथमपुटस्य शेषभागः

## सनातनधर्मस्य राष्ट्रधर्मस्य...

तेन कथितम् अस्मिन महापुरुषे राष्ट्रधर्मः प्रधानतत्वेन प्रतिष्ठितः।

अस्मिन् अवसरे गाथा मंदिरस्य (महाराष्ट्रम् ) संस्थापकः पूज्य पांडुरंगः कथितवान् गोधर्म प्रतिपालकः, हिन्दु धर्म रक्षकः स्वराज्य स्थापकः छत्रपति शिवाजिमहाराजः महाराष्ट्रस्य देवत्वम्। तेन हिन्दु धर्मस्य साधना रक्षा च कृता।

कार्यक्रमे भारतीय शिक्षा परिषदः कार्यकारी अधिकारी श्री एन.पी. सिंहः भारत स्वाभिमानस्य मुख्य केन्द्रीय प्रभारी राकेश 'भारतम् अथ च स्वामी परमार्थदेव, पतंजलि विश्वविद्यालयस्य आई.क्यू.ए.सी. सैल-अध्यक्ष प्रो. के.एन.एस. यादवः, कुलानुशासक स्वामी आर्षदेवः इत्येतैः सहिताः समस्त शिक्षण संस्थानानि यथा- पतंजलि गुरुकुलस्य , आचार्यकुलस्य, पतंजलि विश्वविद्यालयस्य, पतंजलि आयुर्वेद महाविद्यालयस्य च प्राचार्यगणः विद्यार्थिगणः, पतंजलि संन्यासाश्रमस्य संन्यासिनःसाध्व्यः, भगिन्यः च पतंजलि योगपीठेन सम्बद्ध समस्त एकांशप्रमुखाः, अधिकारिणः कर्मचारिणश्च उपस्थिताः।

# उत्तराखंडज्योतिषपरिषद्द्वारा श्रीदेवभूमि पंचांगस्य विमोचनं विहितम्

रुड़की (संवाददाता)। श्री अखिल भारतीय ज्योतिषम् एवं च पंचांग सम्मेलनम् इत्येतयोर् अंतर्गत समायोजिते श्री देव भूमि पंचांग विमोचने अतिथि रूपेण उत्तराखंड विद्वत् सभायाः अध्यक्षः आचार्यो विजेंद्र प्रसाद ममगाई सम्मिलितः । तेन कालगणनायाः आधारेण तिथि, वार, नक्षत्र, योग करण इत्येषां विधि



: प्रकाशिता। उत्तराखंड ज्योतिष परिषदः अध्यक्षः एवंच विमोचन कार्यक्रमस्य समायोजकः आचार्य श्री रमेश सेमवालः समस्त समागतानाम् अंगवस्त्र, माल्यार्पण स्मृति चिह्न प्रदानेन आतिथ्यमकरोत् देशस्य तत्र समागतेषु ज्योतिषाचार्येषु आचार्य श्री अनिल वत्सः, श्रीमती मौनिका जोधपुरम्, सनातन मंदिर दिल्लीतः पीठाधीश्वर श्री राजेश ओझा, संत श्री मोहन किशोरः, श्री सुरेश शर्मा , डॉ राजकुमार शास्त्री, डॉ डीडी शास्त्री, आचार्यः रोहित शर्मा चंडीगढम्, डॉ सुनील पैन्यूली विकास नगरम्, आचार्य मूंदणा नेपालः, डॉ ललित मोहन जोशी, ज्योतिषस्य भीष्म पितामहः डॉ विनय इत्येते स्वीय विचारान् उपस्थापितवन्तः। उत्तराखंड विद्वत् सभायाः महासचिवः आचार्य दिनेश प्रसाद भट्टः, लेखा निरीक्षकः आचार्यः उमेश प्रकाश भट्टः च समागत आचार्येभ्यः सभा द्वारा प्रकाशित वार्षिक पत्रिकायाः अमृत कुंभ स्मारिकायाः गायत्री विशेषाङ्कं दत्तवन्तः। उपाध्यक्ष ललित मोहनः सर्वेभ्यः आभारं व्यक्तीकृतवान्। अमुस्मिन् अवसरे आचार्यश्री धीरज मैठाणी, आचार्यश्री योगेश सेमवालः, रुड़क्यां सभा आजीवन सदस्य आचार्य राजेश ध्यानी, आचार्य सुनील ध्यानी, आचार्य नरेश सेमवाल इत्यादयः समुपस्थिताः।

### समाचरितः डॉ0भीमराव-अम्बेडकरजयन्त्युत्सवः

# शिक्षितो भवेत्, संगठितो भवेत्, सङ्घर्षञ्च कुर्यात्-डॉ0 भीमराव-अम्बेडकरः

बिहारराज्यान्तर्गते दरभङ्गाजनपदे कविनागार्जुनजन्मभूमौ तरौनीग्रामेऽवस्थितेन कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्याङ्गीभूतेन नागार्जुन-उमेश-संस्कृतमहाविद्यालयेन डॉ०भीमराव-अम्बेडकरजयन्त्याः पूर्वसन्धायाम् अम्बेडकरजयन्तीमभिलक्ष्य एकस्य कार्यक्रमस्य आयोजनं




कृतम्। कार्यक्रमस्याध्यक्षं निर्वहता महाविद्यालयस्य प्रभारीप्रधानाचार्येण डा०रामसंयोगरायमहोदयेन छात्रानुद्बोधयता सामाजिकन्यायस्य संवैधानिकनैतिकतायाश्च प्रासङ्गिकताविषये स्वविचाराः प्रकटीकृताः। एतैः शिक्षितो भवेत्, संगठितो भवेत्, सङ्घर्षञ्च कुर्यात् इति अम्बेडकरमहोदयस्य महत्त्वपूर्णं वक्तव्यं रेखाङ्कितं कृतम्। कार्यक्रमस्य सञ्चालनं कुर्वता महाविद्यालयस्य दर्शनविषयकसहायक-प्राध्यापकेन डॉ०छबिलालन्यौपानेवर्येण डॉ. भीमराव-अम्बेडकरस्य सामाजिकयोगदानस्य विषये सम्बोधयन् उक्तं यत्-अद्यत्वेऽपि अपि तस्य संवैधानिकसामाजिकविचारान् स्वीकर्तुम् आवश्यकाः येन वयं समृद्धम्, समानभावपूर्णम्, न्यायपूर्णञ्च च समाजम् अग्रेसरं कर्तुं शक्नुयाम। महाविद्यालयस्य अन्यैः शिक्षकैरपि अम्बेडकरविषयकाः स्व-स्वविचाराः उपस्थापिताः। अवसरेऽस्मिन् महाविद्यालयस्य विद्यार्थिभिः कबीरदास-अंजुकुमारी-श्रुतिप्रिया-अंजलिकुमारीप्रभृतिभिः अम्बेडकरविचारसम्बद्धगीत-भजन-कविता-भाषणानि प्रस्तुतानि। कार्यक्रमेऽस्मिन् महाविद्यालयस्य सहायक-प्राचार्याः डॉ०नितेशकुमारमिश्र-डॉ०सरिताकुमारी-डॉ०नियतिकुमारी-डॉ०सरस्वतीकुमारी- डॉ०रंजीतकुमारठाकुरप्रभृतयः, कार्यालयसहायकः राजकुमारझा, तथा महाविद्यालयीयछात्राः नीतिशकुमार-तुलसीकुमारी-सुधीरकुमारशर्मा-सुधीराकुमारी-दिलखुशकमती-आराध्याप्रिया-अभिनवकार्तिकादयश्चोपस्थिताः आसन्।

# बृहत्तरभारतस्य सीमाप्रसङ्गविमर्श:

– डॉ. लक्ष्मीकान्तविमल:, नवदेहली

नवदेहल्यां स्थितेन श्रीशंकरशिक्षायतन-वैदिकशोधसंस्थानेन मार्चमास्य ३० तमे दिनांके सायंकाले पञ्चवादनत: सप्तवादनपर्यन्तम् अन्तर्जालीयमाध्यमेन 'बृहत्तरभारतस्य सीमाप्रसङ्गविमर्श:' इति विषयमवलम्ब्य एकां राष्ट्रियां संगोष्ठीं समायोज्यत। विषयोऽयं पण्डितमधुसूदनओझामहोदयस्य इन्द्रविजयनामकस्य भारतवर्षाख्यानस्य अन्तर्भूत: अस्ति। भारतीयवाङ्मये भारतवर्षस्य या बृहत्तरा सीमा सुवर्णिता अस्ति तेषां समेषां प्रसंगानाम् एकत्र प्रमाणपुरस्सरेण ग्रन्थकारै: ओझावर्यै: ग्रथितै:।

कार्यक्रमे मुख्यातिथिरूपेण विराजमाना: झारखण्डप्रदेशस्य जमशेदपुरनगरस्थस्य नेताजीसुभाषविश्वविद्यालयस्य कुलपतिवर्या: प्रो. गङ्गाधरपण्डामहोदया: स्वकीये वक्तव्ये प्रतिपादितवन्तो यद् इन्द्रविजयग्रन्थस्य प्रथमप्रक्रमान्तर्गते तृतीय: सीमाप्रसङ्ग: विद्यते। तत्र चतुर्दशप्रमाणानि सुगुम्फितानि सन्ति। पण्डामहोदयै: प्रथमप्रमाणत: चतुर्दशप्रमाणपर्यन्तं संक्षेपेण विषयस्योद्घाटनं कृतम्। तै: प्रतिपादितं यत् भारतवर्षस्य सीमाप्रसङ्गे ग्रन्थकार: लिखति यत् भारतवर्षस्य सीमाया: द्विधा विभाग: अस्ति। पौरस्त्यं पाश्चात्यञ्च। द्वयो: सीमयो: विभाजक: सिन्धु नदी अस्ति। यथोक्तं ग्रन्थकारेण–

**'पौरस्त्यं पाश्चात्यं भारतवर्षं द्विधाकृतं भवति ।**
**अनयोरस्तिविभाजक एष नद: सिन्धुरिति विद्यात्।।'**, इन्द्रविजय:, पृ. २२

अस्यां संगोष्ठ्यां त्रयो वक्तार: सीमाप्रसङ्गे ओझावर्यै: भारतवर्षस्य सीमाविषयकयो: पौरस्त्यपाश्चात्य-विभागयो:प्रदत्तेषु चतुर्दशप्रमाणेषु एकैकं प्रमाणमधिकृत्य स्वकीयं व्याख्यानं प्रदत्तवन्त:।

प्रथमवक्तृरूपेण दीनदयालउपाध्याय-गोरखपुरविश्वविद्यालयस्य संस्कृत-प्राकृतभाषाविभागस्य सहायकाचार्या: डॉ. सूर्यकान्तत्रिपाठिवर्या: इन्द्रविजयग्रन्थस्य सीमाप्रसंगान्तर्गतं षष्ठं प्रमाणम् अङ्गीकृत्य व्याख्यानम् अकुर्वन्। पुराणे भुवनकोश: विद्यते। तेषु भुवनकोशेषु गान्धार- मद्र- पारद- पह्लव- कम्बोज- शक-यवनादिदेशनामानि उल्लिखितानि सन्ति। एते देशा: उत्तरदिशायां विद्यन्ते स्म। भुवनकोशे उल्लेखत्वात् ते एते देशा: भारतवर्षीया: भवितुम् अर्हन्ति। यथोक्तमोझावर्यै:–

'पौराणिके भुवनकोशे भारतवर्षीयावान्तरदेशीय- परिगणनासूदीच्यदेशतया गान्धार-मद्र- पारद- पह्लव- कम्बोज- शक-यवनानि- देशानाम् उल्लेखादेषाम् देशानां पुरायुगे भारतीयत्वम् उपगम्यते।',तत्रैव, पृ. १००

द्वितीयवक्तृरूपेण बिहारप्रान्तस्य छपरानगरस्य जयप्रकाशविश्वविद्यालयस्य संस्कृतविभगाध्यक्षा: प्रो. वैद्यनाथमिश्रमहाभागा: इन्द्रविजयग्रन्थस्य सीमाप्रसंगान्तर्गतदशमं प्रमाणम् उररीकृत्य व्याख्यानं कृतवन्त:। दशमप्रमाणस्य विषय: अस्ति त्रिपुरासुरस्यवध: तथा पृथिव्यां लौहपुरस्य परिचय:। त्रिपुरासुरस्य प्रसंग: श्रुतिग्रन्थेषु ब्राह्मणग्रन्थेषु पुराणेषु समुपलभ्यते। पुराणेषु अपि मत्स्यपुराणे विस्तारेण अवलोक्यते।

'श्रौतग्रन्थे ब्राह्मणाख्ये पुराणे मत्स्यादौ वा त्रैपुराख्यानमुक्तम् ।' तत्रैव, पृ. ११९, का. १

ग्रन्थकार: पण्डितओझामहोदय: स्वयं प्रश्नम् उपस्थापयति। यत् प्राचीने काले यथा देवानां पुरत्रयम् आसीत।तथा एव असुराणाम् अपि पुरत्रयम् आसीत। त्रिषु पुरेषु कुत्र त्रिपुरासुर: निवासम् अकरोत्। इयं शंका मनसि समुपद्यते–

**'आसीत्सुराणां च पुरत्रयं पुरा यथासुराणां त्रिपुरं व्यधीयत् ।**
**कुत: स एकस्त्रिपुरासुरोऽभवत् प्रसिद्ध इत्यत्र न वेद्मि कारणम् ।।'**,

तत्रैव, पृ. १२०, का. ५

तृतीयवक्तृरूपेण श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य न्याविभागस्य आचार्या:प्रो.महानन्दझामहोदया: इन्द्रविजयग्रन्थस्य सीमाप्रसंगान्तर्गतसप्तमं प्रमाणं स्वीकृत्य व्याख्यानं प्रस्तुतवन्त:। पौराणिके भुवनकोशे उल्लिखितस्य मद्रदेशस्य महर्षि: काप्य: निवासी आसीत्। तस्य प्रमाणं यजुर्वेदस्य वाजसनेयशाखायाम् लभ्यते–

'तथाहि वाजसेयश्रुतौ उद्दालक आरुणिर्याज्ञवल्क्यं प्रति सूत्रात्मानम् अन्तर्यामिणं च पृच्छन्नाह– 'मद्रेष्ववसाम पतञ्जलस्य काप्यस्य गृहेषु यज्ञमधीयाना:' ते हीमे यज्ञवेदाध्यापकस्य काप्यस्यर्षेनिवासप्रदेशा मद्रा:।',तत्रैव पृ. ११३

संगोष्ठ्या: अध्यक्षत्वेन विराजमाना: जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृत-प्राच्यविद्याध्ययनसंस्थानस्य आचार्या: प्रो. सन्तोषकुमारशुक्लमहोदया: स्वकीये आध्यक्षीये उद्बोधने कथितवन्त: यत् इन्द्रविजयग्रन्थे सीमानिर्धारणस्य द्विधा कारणम् अस्ति। राज्यशासनव्यवस्था भौगिलिकस्थितिश्च। शासनद्वारा या सीमा निधर्यिते सा सीमा अनित्या। यतोहि यो राजा राज्यं करोति स: स्वशासनकाले पूर्वव्यवस्थां नवीकृत्य स्वनाम्न: नूतनव्यवस्थाया: स्थापनं करोति। यथोक्तं ग्रन्थकारेण–

'इह हि भुवनकोशे देशविभाग: द्विविधा निरूप्यन्ते- राज्यशासनव्यवस्थिता: भौगोलिक-गणितव्यवस्थिताश्च। तत्र शासनकृतविभागा अनित्या अव्यवस्थिता: काले काले विभद्यन्ते। ये देशा येन राज्ञा जीयन्ते, ते तदायत्तनामरूपा: पूर्वापेक्षया क्वचिदन्येन नाम्ना निर्दिश्यन्ते। अत एव तु भारतीयानामिमे गान्धारदेशा अफगानिस्थानशब्देन, हिङ्गला देशा: प्रथमं सुगदियानाम्ना पश्चाद्बिलोचिस्ताननाम्ना व्यवह्रियन्ते स्म।', तत्रैव पृ. १३९

संगोष्ठ्या: प्रारम्भ: श्रीलालबहादुरशास्त्रिराष्ट्रिय- संस्कृतविश्वविद्यालयस्य शोधछात्रेण श्रीप्रवीणकोइरालामहोदयेन कृतेन वैदिकमङ्गलाचरणेन सञ्जात:। कार्यक्रमस्य सञ्चालनं श्रीशंकरशिक्षायतनस्य वैदिकशोधसंस्थानस्य शोधाधिकारी डॉ. मणिशंकरद्विवेदी कृतवान् धन्यवादज्ञापनञ्च डॉ. लक्ष्मीकान्तविमल: अकरोत। वैदिकशान्तिपाठेन संगोष्ठ्या: समापनं सञ्जातम्। अस्मिन् कार्यक्रमे विविधेभ्य: प्रान्तेभ्य: विश्वविद्यालयस्य महाविद्यालयस्य च आचार्यै: शोधच्छात्रै: विषयानुरागिभिश्च सोत्साहं प्रतिभागिता कृता।

# दिल्यां बालभारतीपब्लिकविद्यालये बाल-काव्य-कलरव: इत्याख्या बहुभाषीया छात्रकविगोष्ठी समनुष्ठिता

डॉ. युवराज भट्टराई, कार्यक्रम-समन्वयक:

शुक्रवासरे ऐषम: अप्रेल् द्वादश्यां दिल्ल्या: गंगारामचिकित्सालयमार्गस्थितस्य अतिप्रतिष्ठितस्य प्रशासनेतर-विद्यालयस्य बाल भारती पब्लिक स्कूल इत्यस्य वरिष्ठ विभागस्य वर्नाकुलर क्लब द्वारा आदरणीयप्रधानाचार्यस्य श्रीलक्षवीर सहगलवर्यस्य मार्गदर्शनेन अभिप्रेरणया च बाल-काव्य-कलरव: इत्याख्या छात्रकविगोष्ठी विद्यालयस्य एव वरिष्ठ विभागद्य पुस्तकालये समायोजिता। यतोहि एतत् क्लब विद्यालये भारत-देशस्य बहुभाषीय-समाजस्य संवर्धनं सामरस्यं च अभिलक्ष्य कार्याणि कुरुते अत: कार्यक्रमे हिंदीभाषाम्




अतिरिच्य देशस्य नैकेषां राज्याणां कोण-कोणेभ्य: विद्यालये अध्यनार्थम् समागतै: भिन्न-भिन्न राज्याणां छात्रै: तासु तासु प्रादेशिकभाषासु रुचिपूर्णा: कविता: प्रस्तुता:। काव्यपाठ कर्तृभि: छात्रै: तत्तद्राज्याणां संस्कृति-सभ्यता-द्योतनार्थं तत्रत्यमेव पारम्परिकं परिधानमपि धारणं कृतम् आसीत्। वस्तुत: एषा बहुभाषीया छात्रकविगोष्ठी सर्वकारस्य स्थानीयतायै मुखरता इति प्रकल्पेन प्रेरिता सती छात्रेषु भारतीयभाषाणां संवर्धनार्थं एक: पदक्षेप: अस्ति।

अस्य कार्यक्रमस्य अध्यक्षता, विद्यालयस्य एव उपप्राचार्या श्रीमती विनीता-धवनवर्या कृतवती। बहुभाषीय-कविगोष्ठी-कार्यक्रमस्य शुभारम्भ: दशम्या: कक्षाया: छात्रया काश्वी शर्मणा मङ्गलाचरणत्वेन प्रस्तुतेन गणेशाथर्वशीर्षेण साकम् अभवत्। तदनु नवम्या: कक्षाया: छात्रेण कोविद अग्रवालेन संस्कृतभाषायामेव डॉ. युवराजभट्टराई विरचितं श्प्रेमभावै: समेषां शुभं स्वागतम्श इत्याख्यं स्वागतगीतं प्रस्तुतम्। तत्पश्चात् उपप्रधानाचार्या श्रीयुता विनीताधवन महोदया स्वीयेन अभिप्रेरकौद्घाटनिक-वक्तव्येन छात्रान् उत्साहयन्ती तान् सर्वान् मातृभाषा: पठितुं लिखितुं वदितुं च अभिप्रेरितवती। अमुना प्रोदितं यत् चर्चा-परिचर्चा, लेखनं, पठन-पाठनं अन्तरनुशासनदृष्टेश्च जीवन्तम् उदाहरणम् अस्ति अस्माकं बाल भारती पब्लिक विद्यालय: । यत्र प्रतिदिनं वयं किमपि किमपि नूतनं शिक्षणं प्राप्नुम: किमपि नूतनं च पठाम:। अथ च अद्यापि अस्मिन् छात्रकविगोष्ठी कार्यक्रमे वरिष्ठविभागस्य शिक्षक-शिक्षिकाभि: छात्र-छात्रैश्च साकं कविता-छन्द-रस-मातृभाषा-संवर्धनस्य नैकेषु विषयेषु आयोजिता एषा बहुभाषीया छात्रकविगोष्ठी अवश्यमेव सार्थकीभूता अस्ति।

अस्मिन् छात्रकविसम्मेलने विभिन्नभाषा भाषिण: त्रिंशदधिका: छात्रप्रतिभागिन: प्रतिभागितां कृतवन्त:। एतेषु प्रतिभागि-छात्रेषु कतिपयै: स्वरचिता: कविता:, कतिपयैश्च स्वेच्छया कुतश्चित् संकलिता: सुन्दर-रचना: सस्वरं लय-ताल-पूर्वकं मञ्चे प्रस्तुता:। मंचस्य सफलसंचालनमपि दशम्या: कक्षाया: छात्राभ्यां रायका सिंह: तिष्या कालरा चेत्युभाभ्यां सम्यक् कृतम्।

कार्यक्रमस्य अन्ते हिन्दीशिक्षिका श्रीमती सुनीता रावत:, संस्कृतशिक्षक: श्रीयुत: युवराजभट्टराईवर्य: हिन्दीशिक्षक: श्रीयुत: उमेशभारद्वाजश्च उपस्थितान् सर्वानपि छात्र-रचनाकारान् कविता वाचकान् च निज-प्रेरक-वक्तव्यै: सम्बोध्य मातृभाषाया: मातृभूमेश्च महत्ताया: विषये उद्बोधितम् । अवधेयमस्ति यत् धन्यवाद-ज्ञापनपूर्वकं सामूहिक-चित्रांकनेन साकं, कार्यक्रम: सम्पन्नताम् अगच्छत्। समस्तकार्यक्रमस्य सुचारुसंचालने नवम्या: कक्षाया: सक्रियौ छात्रौ वंश-शर्मा, कपीश-अग्रवालश्च पूर्ण मनोयोगेन सहयोगं कृतवन्तौ, अपरत्र च कार्यक्रमस्य छायांकने दृश्यांकने नवम कक्षाया: एव मिशिकागुप्ता, नील बडलानीत्यनेन छात्रद्वयेन सविशेषं योगदानं कृतम्। अन्ते च सर्वै: सम्भूय 'जय मातृभूमि:, जाय मातृभाषा:' इत्युद्घोषेण साकं कार्यक्रम: सम्पूरित:।

# निरीक्षणम्

भारतसर्वकारस्य शिक्षामन्त्रालयेन सञ्चालिते केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे प्रधानमन्त्रिकौशलविकासयोजनाऽन्तर्गते प्रचाल्यमानस्य प्रशिक्षणस्य निरीक्षणम् , देहिलिस्थे भारतीयनाट्यविश्वविद्यालयत: समागता डॉ हिमांशी महोदयया अप्रैल मासस्य षोडशदिनाङ्के कृतम्। प्रधानमन्त्रिकौशलविकासयोजनाऽन्तर्गते भोपालपरिसरे वृत्तिविषयमुद्दिश्य विषयत्रयस्य प्रशिक्षणं प्रचलति। तत्र प्रथम: विषयोऽस्ति ( एडीटर) सम्पादनम्। द्वितीयो विषयऽस्ति शैक्षिकव्यवसायपरामर्श:। (एजूकेशन कैरियर काउंसलर ) तृतीयो विषयोऽस्ति स्वास्थ्य प्रशिक्षणम्।



(फिटनेश ट्रेनर) इदं प्रशिक्षणम् मार्चमासस्य त्रिदिनाङ्कत: आरभ्य जूनमासं यावत् भविष्यति। मासचतुष्टयात्ममिदं प्रशिक्षणम्। प्रशिक्षणेऽस्मिन् शत छात्रा: प्रविष्टा: सन्ति। कार्यदिवसेषु त्रिवादनत: आरभ्य षडवादनं यावदिति कृत्वा हेरात्रये प्रशिक्षणं भवति। कार्यक्रमस्याऽस्य संयोजक: संगणकप्राध्यापक: डॉ सुमितसक्सेना विद्यते। प्राध्यापकत्वेन डॉ वरुण पोखरियाल: डॉ महिमा तिवारी, दीपकधाकडाश्च वर्तन्ते। मार्गदर्शनञ्च प्रो. नीलाभतिवारिमहोदयस्य , प्रो. प्रदीपकुमारपाण्डेयस्य डॉ अवनि शर्मणश्च च वर्तते। सर्वोऽपि कार्यक्रम: कुलपतिमहोदयानां संरकक्षकत्वे परिसरनिदेशकमहोदयानां संयोजकत्वे च प्रचलति।

# सम्पादकीयम्

सम्मानिताः सुजनाः!

सादरं नमोनमः।

सहर्षमिदमभिसूच्यते यदस्य संस्कृतसंवादस्य दशवर्षाणि पूर्णानि। अयमंकः भवद्भ्यः सोल्लासमर्प्यते। संस्कृतसंवादस्य इयं यात्रा ०१जुलाई २०११ इति खिष्टाब्दे आचार्यवर्याणां भवतां पद्मश्रीरमाकान्तशुक्लमहोदयानां कविवर्याणां प्रो. राधावल्लभत्रिपाठिनां प्रेरणया प्रारब्धा आसीत्। मध्ये मध्ये महान् सहयोगो भवतामहर्निशमलभ्यत मयेति अस्य प्रकाशने इति संस्मरन्ती अतीवानन्दमनुभवामि। सुखस्य वार्ता इयमस्ति यदस्य पाठकाः देशे देशान्तरे विद्यमाना अनुदिनं संस्कृतभाषाया ध्वजमुत्तोलयन्ति। संस्कृतपत्रकारिताक्षेत्रे अस्य पाक्षिकपत्रस्य योगदानमविस्मरणीयमस्ति। देशस्य विदेशस्य मुख्यवार्ताः कवीनां कविता लेखकानां लेखा इति इमं संवादं समलंकुर्वन्ति। दशाब्दसम्पूर्त्यावसरे अहं भवतः सर्वान् गुरून् विदुषः सहयोगिनः प्रणमन्ती स्मरामि हृदि भावयामि च।

विजानन्ति भवन्तो यत् संस्कृतपत्रप्रकाशनमस्मिन् समये यद्यपि दुष्करं प्रतिभाति, किन्तु स्वल्पेन भवतां सौजन्येन एतत्कार्यं सुकरं भवति। विगतवर्षयोरस्य संस्कृतसंवादस्य पाठकानां संख्या भूयसी जाता, अहमभिलषामि यत् समयेनास्य प्रकाशनं शुद्धं सामयिकं सुरभारतीसमुन्नयनपरं धर्मानुरूपं भवेत्। अतो भवन्त एव प्रार्थये यदस्य सार्वत्रिकप्रसाराय सार्वभौमिकविकासाय सर्वजनसौलभ्याय च निरन्तरमस्मान् निस्सन्देहं प्रेरयन्तु। अहन्तु वाञ्छामि यदयं संवादः संस्कृतजगति महतीं ख्यातिं लभताम्, अनुपक्षं देशस्य सेवां कुरुतां चेति।

अन्ते भगवन्तं शिवं वन्दमाना अस्य संस्कृतसंवादस्य प्रचाराय प्रसाराय सहयोगाय च परमोपकारिणो भवतो नौमि।

अमरवाणी विजयताम्

भवदीया

सम्पादिका

॥ वेदवाणी ॥

'अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥
न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥'

'O! Lord Varuna! Redeem us from the adverse impact of sins, if any, committed by our forefathers. Similarly, pardon us for the sins committed by our own bodies in this birth and free us from the impact thereof. Just as one avoids a thief who gives grass to stolen cattle for satisfying it, keep the noble away from sin in the same way.""O! Lord Varuna! Our own strength, even if not originally inclined toward commission of sins, tends to go astray when obstacles crop up in the path of progress. Liquor,anger, temptation, gambling, ignorance, indiscretion and indifference to duty- all these push one toward committing of sins. Sometimes, the old influence the young to do wrong things.Sleep and lethargy also make one inclined toward falsehood and sinning. Let us be alert about all these pitfalls.'

The Rig Veda 7.86.5&6

'अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥
अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥'

'Making myself sinless, I bow down to Lord Varuna who nourishes His devotees, protects them and fulfills their legitimate aspirations. I serve the Supreme Lord as a faithful servant. He inspires and guides the ignorant in the right direction. He, particularly, prods the wise devotee who prays to Him, toward great riches and prosperity. This prayer in praise of Lord Varuna who confers the wealth of food on His devotees, may yet remain the best in our hearts. May this strike a harmonic chord in You. May our well-being be rooted in auspiciousness. May our gains from labour also be based on an auspicious foundation. O! Lord Varuna! May You always protect us with auspicious means of well-being.'

The Rig Veda 7-86-7&8

संकलन :
एस.वासुदेव रावः

# भव्याभिलाष इति गीतिकाव्यस्य समीक्षणम्



-डॉ. अरविन्दकुमारतिवारी
काव्यामृतवर्षिणी-सम्पादकः
अमरवाणीकविपरिषत्परिकल्पकः
साहित्य-अकादमीपुरस्कृतश्च

संस्कृतसाहित्यं गंगाप्रवाह इव निरन्तरमग्रे वर्द्धमानमस्ति। अनुदिनमस्मिन् साहित्ये नवनवोन्मेषशालिविदुषां भावा गद्यपद्यद्वारा व्यक्तीभवन्तीति भाषणे न संकोचो मम भवतां वा मनसि भवेत्। आधुनिकयुगे सर्वत्र सुकविभिः काव्यानि गीतानि रच्यमानानि सतां महतां मनांसि हरन्ति सन्तीति को न विजानाति। अस्मिन्नेव युगे स्वनामधन्याः महान्तः समीक्षकाः आचार्याः रहसबिहारिद्विवेदिमहोदयाः अभिनवां गीतिसृष्टिं कृत्वा मार्गदर्शनं कुर्वन्तो वर्तन्ते यूनामिति मन्यामहे वयम्। असकृदेतैरुपकृता वयं समीक्षणेन मोदामहे विलोक्येमां गीतिसर्जनां भव्याभिलाषाख्यामिह।

भव्याभिलाषो विश्वभारतीपुरस्कारभाजां महामहोपाध्यायोपाधिविभूषितानां राष्ट्रपति- पुरस्कारपुरस्कृतानां विमलमतीनां गभीरतत्तवान्वेषकाणां श्रीमतां परमोदाराणाम् आचार्याणां रहसबिहारिद्विवेदिनां देशभक्तिभावनां सूचयति। अस्मिन् गीतिकाव्ये मंगलाचरणान्ते त्रयश्चत्वारिंशद् गीतानि विलसन्ति। तदन्ते षोडश श्रद्धांजलयो विराजन्ते। मंगलाचरणे कविरयं महर्षिवाल्मीकिं संस्मृत्य अभिराजादिकवीन् सादरं स्मरति। यथा

**श्रीवाल्मीकिसमारम्भां कालिदासादिमध्यमाम्।**
**अभिराजादिपर्यन्तां वन्दे कविपरम्पराम्।।**

प्रथमा गीतिः जननि! संगमनी परिपाहि माम् इति मातुः सरस्वत्याः स्तवनमिव विराजते। यत्र ब्राह्मी संस्तुता वर्तते, यथा

**सकलशब्दयुते! श्रुतिवर्णिते! विमलबुद्धिविधायिनि! शारदे!**
**भयहरे! मतिदे! कविशक्तिदे! जननि! संगमनी परिपाहि माम्।।**

अयं गीत्यंशो मनो मोहयति सचेतसामिति।

द्वितीया गीतिः केयं नवोदिता कविता इति शीर्षकेण सृष्टा विशिष्टा प्रतिभाति, यत्र महाकविकालिदासस्य आचार्यमम्मटस्य चानायासं प्रभावः आपतितो वर्तते, यथा

**वागर्थप्रतिपत्तियुता रम्या नियतिनियमरहिता।**
**याऽह्लादकैमयी ललिता सेयं नवोदिता कविता।।**

इयं मनोहारिणी परिभाषा कवितायाः विज्ञान् सरसानेवानन्दयति।

तद्भारतं त्वदीयं हे भारतीयवीराः! इति शीर्षकान्विता तृतीया गीतिर्दिव्यं भारतं भव्यं भारतं संस्तौति। यथा

**यत्रार्णवाः सभंगाः गंगा च सत्तरंगा।**
**प्रवहन्ति शान्तिसंगाः मलयोल्लसत्समीराः।।**

तद्भारतं त्वदीयं ---

वेदा भारतस्य प्राणाः सन्ति, कविरयम् अस्यां गीतिकायां समग्रं भारतं संस्तुवन् स्वमनोभावमेव वर्णयति-

**वेदध्वनिः ससारः संश्रूयते सतारः।**
**जगतीह सत्प्रसारः यत्तत्त्वगाः गभीराः।।**

तद्भारतं त्वदीयं--

अत्र अनुप्रासच्छटा दर्शनीया विलसति। अहो गीतिमाधुर्यम्।

देशप्रेमी सूक्ष्मदृष्टिसम्पन्नः समीक्षको विजानाति यत् भारते भेदकैः उपद्रवो विधीयते। जातिवर्गवर्णधर्मक्षेत्रवादबाणैः विखण्डयन्ति भारतम्। क्षुब्ध आचार्यो रहसबिहारी द्विवेदी गुरुवर्यः सानुनयं भारतीयान् सम्बोधयन् ब्रूते-

न भारतं विकीर्यताम्

इयं चतुर्थी गीतिरस्ति। या बहुत्र पाठ्यपुस्तकेषु वर्तते, पाठ्यते गीयते सादरमिति विजानीमो वयम्। अस्याः गीतेरेकमंशमुदाहरामो यथा-

**राष्ट्र एकता न खण्डिता विधीयताम्**
**न भारतं विकीर्यतां सखे!**
**एहि एहि सत्वरं भारतीयचत्वरं**
**जातिवर्गभेदभावना न धीयताम्।।**

राष्ट्र एकता न खण्डिता विधीयताम्।

पर्यावरणस्य पोषकः आचार्यो द्विवेदी वनं सदैव रक्ष्यताम् इति शीर्षकेण लिखति मनोभावान् यथा-

**रक्षितोऽसि येन तत् त्वया न नाश्यतां**
**वनं सदैव रक्ष्यतां सखे!**
**रक्ष रक्ष वृक्षकं तक्ष मा क्वचिद् वनम्**
**पादपान् विरोप्य तत्कुलं प्रसाध्यताम्। रक्षितो-**

अस्यां गीत्यामद्भुतः सन्देशो दत्तो विलोक्यते। अग्रे विभाव्यताम्-

**राष्ट्रचिह्नपरिचयाय सिंहवंशवर्धनाय**
**निर्भयं तदर्हकाननं विरच्यताम्। रक्षितो-**

भारतवर्षस्य विकासं कामयमानो गुरुवरो द्विवेदी भव्याभिलाषे गीतिकाव्ये तन्मनो भारतीयं कथं कल्पताम् इति शीर्षकेण लिखति यत्--

**ये न जानन्ति वेदं न रामायणं**
**नैव गीतां महाभारतीयां कथाम्।**
**कालिदासं न गोस्वामिनं मानसं**
**तन्मनो भारतीयं कथं कल्पताम्।।**

इयं गीतिका अतीव मनोहारिणी भारतीयं जनमाकर्षन्ती दृश्यते। वस्तुतः वेदादिशास्त्राणि विना भारतं नास्त्येव। अस्यां गीत्यामाचार्यवासुदेवद्विवेदिनां प्रथितस्य श्लोकस्य भावो दरीदृश्यते। यथा --

**विना वेदं विना गीतां विना रामायणीं कथाम्।**
**विना कविं कालिदासं भारतं भारतं नहि।।**

आचार्यवर्यस्य संस्कृता भारती भाति वैज्ञानिकी, असभ्यतात्वारिंशका गीतिद्वयी विशिष्टं स्थानं लभते।

असभ्यतापंचचत्वारिंशिका-गीतिकायां कविना भारतस्य सांस्कृतिकीं चेतनां व्यक्तीकरोति। प्रतिशब्दं विशेषतया विवृणोति-

यथा

**पाति योसौ पिता भारते कथ्यते,**
**किन्तु तस्मै हलो डेड सम्बोध्यते।**
**ईहते या सुमाता ममी कथ्यते**
**भारतासभ्याहर्निशं वर्धते।। 1**

कविर्वक्ति यत् पिता स एव भवति, यः पाति रक्षति सन्ततिम्। किन्तु भारते डेड इति यत्सम्बोधनं क्रियते तदस्ति अशोभनीयमिति। माता सम्प्रति ममीति कथ्यते, एतदपि अशोभनम्। अतः भारते असभ्यता वर्धमाना दृश्यत इति कविना स्पष्टीकृता वर्तते।

अग्रे विभावयन्तु-

**प्रीतिभोजातिथेयेन नैजः करः**
**स्वागते स्वातिथीनां मुदा मिश्र्यते।**
**दूषितेनैव हस्तेन सम्भुज्यते**
**भारतासभ्यताहर्निशं वर्धते।। 2**

अस्यां महत्त्वपूर्णायां गीतिकायां कथयति यत् दूषितेन हस्तेन भोज्यादिपाको विधीयते। तेन रोगा जायन्ते, अतः स्वागतकाले भोजनावसरे च हस्तमेलनं न विधेयम्। नमस्त इति वक्तव्यम्। मन्ये कोरोनकाले या दशा आसीत् विश्वस्य तामेव दशां स्मारयिमुमीहते कविवरो गुरुवरः आचार्यो रहसबिहारी द्विवेदी महोदयः।

असभ्यताचत्वारिंशिकायामुच्यते समीक्षकेण महाकविना श्रीमता द्विवेदिना यत् भोजने बहवः पदार्थाः त्यज्यन्ते भोक्तृभिः। इयं दूषिता प्रणाली वर्तते। अनया सभ्यता क्षीयते भारतीया। पुराकाले पंक्तिबद्धा जनाः उपविश्य कदलीपत्रे भोजनं कुर्वन्ति स्म। तत्र स्वेच्छया गृह्णन्ति स्म। किन्तु साम्प्रतं तु बभरशैल्याम् उत्थाय प्रायशः भुंजानाः जनाः यावन्न खादन्ति तावद् भोजनं त्यजन्ति। विवाहकाले मार्गावरोधो न रोचते कवये। अयं सभ्यतां दर्शयन् कथयति गुरुवरो यत्-

**यत्र पाणिग्रहस्योत्सवे नर्तने**
**प्रायशो मार्गरोधो दरीदृश्यते।**
**भोजनं चार्धरात्रात्परं गृह्यते**
**भारतासभ्यताहर्निशं वर्धते।।**

आयुर्वेददृष्ट्यापि भोजनं सूर्यास्तात् प्रागेव ग्राह्यम्। किन्तु विवाहे अर्धनिशायां भोज्यते, तत्रापि उष्णं शीतं शीतोष्णमिति विचार एव विधीयते। अतएव तु भोक्तारो भवन्ति अस्वस्थाः। इयं नास्ति भारतीया सभ्यता भोजनस्येति कवेर्भावः।

श्रीमान् द्विवेदी महोदयः कथयति यत् शैशवादेव वंशस्य या कार्यप्रणाली सा ग्राह्या। तत्रैव दाक्ष्यमुपादेयम्। आरक्षणेन सा प्रणाली लब्धुं न शक्यते। अतएव असभ्यता अनुदिनमेधते। यथा

**शैशवादेव वंशस्य कार्यान्विता**
**दक्षता सन्ततौ भाति नैसर्गिकी।**
**यत्र सारक्षणे चाद्य नाशं गता**
**भारतासभ्यताहर्निशं वर्धते।।**

कविरयं भारतवर्षे सभ्यतासंस्कारमयमीहते। पाश्चात्यसभ्यताप्रभावितं भारतं द्रष्टुं नाभिलषतीति प्रतीयते। ततः श्रुतिपरा भरतावनिसंस्कृतिरिति गीतिर्भारतवर्षस्य अतीतं स्मारयन्ती सचेतसां मनांसि हरते। यथा

**बदरिकामरनाथशिरोमयी सुरसरिद्यमुनासरयूजला।**
**दशरथात्मजकृष्णजनिस्थली दशमुखादिवधे प्रथितापरा।।**

भारतस्य कवीनामिदमस्ति वैशिष्ट्यं यदेते मातृभूमिं प्राणप्रियां मन्वते। देशस्य रक्षणे ये सैनिकाः तत्पराः सन्ति, तेषां कल्याणं कामयमानः आचार्यो रहसबिहारी द्विवेदी गुरुवर्यो विलिखति-

**राष्ट्रस्य सीम्नः परिरक्षणे ये हिमे च तापे सततं सतर्काः।**
**जेष्यत्यतो भारतराष्ट्रमाप्तं स्वस्त्यस्तु तेभ्योऽखिलसैनिकेभ्यः।।**

पार्वती शंकरेण सह विवाहं कथं कृतवतीतिशीर्षकेण रचिता कविता मनोविमोहयति। यथा

**फलाहारी शिवो नूनं पर्णाहारिणी च सा।**
**अतो भोजननिर्माणभाण्डमार्जनमुक्तिता।।**

अहो विनोदप्रियतेति श्रीमतां द्विवेदिमहोदयानाम्।

शेषभागः सप्तमपुटे

# काव्यमालायां प्रतिबिम्बिता सामाजिकी चेतना

-डॉ० मीरा द्विवेदी

साम्प्रतिकं संस्कृतसाहित्यम् अभिनवैभावैरभिनवार्भिभङ्गिभिर्वैविध्यमयैः रचनानुवादप्रकारैश्च सुसमृद्धं राराज्यते। नवनवोन्मेषमहिते अर्वाचीनसंस्कृतवाङ्मये नैके कवयः सुकवयो महाकवयः समालोचका विवेचका अनुसन्धातारश्च स्वप्रतिभाविलासं सूक्ष्मविवेचकताम् अनुदिनम् अभिव्यञ्जयन्ति। समाजसंस्कृतिराजनीत्यादिदृशाऽपि नूनमिदं सुचारुजीवनस्पन्देन सततमेव स्पन्दायते। महाकाव्य-गीति-गद्य-पद्य-चम्पू-लहरी-हायिकू-गलज्जलिकादिप्रत्ननूतनविधाभिः समृद्धे साहित्ये सामाजिकविसंगतयो राजनीतिकविद्रूपता नारीविषयकसमस्या दैनन्दिनव्यवहारे भृशं व्याप्ता भ्रष्टाचाराः पूर्वापेक्षया सशक्ततूलिकाभिरङ्कयन्ते साम्प्रतिकैः रचनाकारैः, परिणामत इदं साहित्यं कस्याश्चिद् भाषायाः सम्पन्नसाहित्येन तुलयितुं शक्यते।

'काव्यमाला' साहित्यविद्यावारिधिभिः श्रीमद्भिः कैलाशनाथद्विवेदिमहाभागैः प्रणीता दिल्लीसंस्कृताकादम्या आर्थिकसाहाय्येन 2003 तमे वत्सरे कुसुमकुलाय-अजीतमल-उत्तरप्रदेशतः प्रकाशिता अस्ति। अत्र सरसा मधुराः पद्यरचना देवतास्तोत्र-महापुरुषस्तवन-भारतगौरव- लोकजीवनादिसम्बद्धाः संकलिताः सन्ति। आसु पद्यरचनासु समाजस्य सामयिकघटना लोकजीवनञ्च प्रभविष्णुतया चारुतया चित्रितमस्ति। एतस्मिन् काव्यसंकलने सरस्वती-शिव-विष्णु-हनुमत्प्रभृतिदेवतानां राम-कृष्ण-विवेकानन्द-गान्धि-इन्दिरादीनां महापुरुषाणां स्तवनेन सह 'राष्ट्रस्तवनम्-ऋतुवर्णन-यौतुकप्रथात्याज्या' 'धर्मान्तरणं प्रति', 'मरन्त्वातङ्कवादिनः', 'पोखरणें परमाणुपरीक्षणम्', 'श्रमगीतं सततमिह गेयम्', 'भङ्ग्धि भ्रष्टाचारम्' चेत्यादिशीर्षकाङ्किता काव्यरचना राष्ट्रियसामाजिकमूल्यप्रधानाः परमोपादेया यथार्थं प्रति जनमनांसि समुद्वेलयितुं समर्थाः सन्ति। कतिपयनिदर्शनानि निरूप्यन्तेऽत्र ।

विविधैः संचारमाध्यमप्रसारिताभिर्वार्त्ताभिर्वयं जानीमो यत् सम्प्रति देशस्य अन्ताराष्ट्रियाः सीमानो नैव निरापदाः सन्ति । अनुदिनं परराष्ट्रप्रायोजितेनातङ्कवादेन सीमान्तप्रान्तवर्तिनी शान्तिर्विलुप्ता। कृषकाः पशुपालका ग्रामीणाः शत्रुसैन्यप्रेरिताभि गुलिकाभिः पलायन्ते म्रियन्ते वा। इयम् अवस्थापि कविम् उत्प्रेरयति आतङ्कदानवदलनाय। अतः आह्वयति स तस्य दलनाय राष्ट्रप्रेमिणः-

**ग्राम्यनागराः कथं पलायिता द्रुतं सखे !**
**सखेदमत्र श्रूयते ध्वनिस्तु धाँय-धाँय कः?**
**आतङ्कवादिनां दिवानिशं निशाचरी गतिः,**
**स्वराष्ट्रभक्तिलोपिका घृणाव्रणाङ्कगुल्लिकाः !**
**निर्भया भवन्तु राष्ट्रप्रेमिवीर भारताः,**
**आततायिनां विनाशनं वरं, न शोभते क्षमा ॥**
**( शान्तिसीमन्तिनी रञ्जतु मनोरमा, ( का.मा., पृ. 107 )**

सम्प्रति भारतवर्षस्य सामाजिकं लोकजीवनं सर्वतः विविधाभिः समस्याभिः समाक्रान्तं दरीदृश्यते। आतङ्कस्य भीषणज्वालायां समाजस्य समरसता दन्दह्यते। नागरेषु ग्रामीणेषु आजीविकाया विकरालसमस्या जाजृम्भ्यते। गृहाद् बहिरन्तोऽपि जना आत्मानं निरापदं नैवानुभवन्ति । एता बहुविधसमस्याः कविवरो 'देवकलीदर्शनम्' इत्यस्मिन् स्तोत्रे देवकलीदेव्याः स्तुतिव्याजेन उपस्थापयति सहृदयहृदयपटले।

देवकलीदेवायतनं कलिन्दकन्यातटे बुन्देलखण्ड-इष्टिकापुर (इटावा) सीमान्तप्रदेशे शेरगढघट्टस्य समीपे स्थिरमद्यापि लोलुक्यते। आदौ कविरस्य स्थानस्य पौराणिकम् ऐतिहासिकं महत्त्वञ्च ख्यापयति। अनन्तरं सामाजिकसमस्याः प्रस्तुवन् देवीदेवकलीं संस्तूय मुक्तिं याचते एताभ्यः। सामाजिकदृशा एतत् स्थानं पुरा राजपूतबहुलम् आसीत्। राजपूतानां पूर्वजा योद्धारो मुस्लिमशासनकाले यवनैर्युद्धरता आसन्। अनन्तरम् आङ्ग्लशासकैः युध्यन्तः स्वातन्त्र्ययज्ञे निजाहुतिं दत्तवन्तः। तेषां वंशजा अत्रत्या जनाः स्वातन्त्र्यकामा युद्धवीराः पराक्रमिणः सन्ति। स्वतन्त्रताप्राप्तेः पश्चात् इदं क्षेत्रम् आर्थिकशैक्षिकराजनीतिकदृशा प्रशासनस्य उपेक्षितत्वात् सम्यक् विकासेन वञ्चितमस्ति। जनानां समक्षे आजीविकाया अपि समस्या वर्तते। प्रायः प्रशासनस्य जनसम्पर्कसूत्राणि अयोग्यानि पक्षपातान्यायपूर्णानि अक्षमाणि सन्ति। परिणामतः सम्यक् न्यायाभावे अर्थाभावे च जना विद्रोहिणः सन्तो दुस्साहसे दस्युकर्मणि प्रवृत्ता जनजीवनं पीडयन्ति। उत्कोचलिप्सूनाम् आरक्षिणां भ्रष्टाचारैरेतेषां पोषणं भवति। कविर्वाञ्छति अस्य स्थलस्य समग्रविकासं भ्रष्टाचारविमुक्तिञ्च-

**न पीडितो भवेत् कश्चित् क्वारक्षिधनलोलुपैः।**
**भयनाशव्रते एते रक्षका न तु भक्षकाः॥**
**भ्रष्टाचारो न भूयात् प्रकृतेः पावनाङ्गने ।**
**आरक्षिणोऽत्र रक्षायै सन्नद्धाः स्युर्दिवानिशम्॥**
**दुर्दान्तदस्युच्छायाऽपि न कुत्रापि विभीषयेत्।**
**हत्यापहरणं क्रौर्यं लुण्ठनञ्चापि वर्जयेत्॥ ( का.मा., पृ.69 )**

कविरत्रत्येन प्रचलितेन गोवंशघातेनापि अतिशय आक्रुष्टः प्रतीयते। गोवंशः स्थानीय- ग्राम्यजीवनस्य अर्थव्यवस्थाया आधारोऽस्ति । अतः कविः काङ्क्षति गोवंशघातविरामं कृषिकर्मविकासम्।

**दुर्गन्धियुक्तं खलदस्युग्रस्तं,**
**क्षेत्रं च कार्यं भयमुक्तमाशु।**
**गोवंशघातेऽत्र भवेद् विरामः,**
**स्वारक्षिभिः स्याज्जनदस्युनाशः॥ ( का.मा., पृ.67 )**

आधुनिके यान्त्रिकताबहुले व्यस्तजीवने प्रतिदिनं पर्यावरणप्रदूषणनिवारणार्थं भूतलक्षरणरक्षणाय ग्रीष्मे शीतलसुखदच्छायासुलभाय महत्त्वपूर्णौषधिसमिल्लाभाय ग्रामे ग्रामे, मार्गे मार्गे, क्षेत्रे क्षेत्रे, सर्वत्र प्राकृतिकसुषमां संवर्धयितुं वनस्पतीनां संरक्षणं कर्तव्यम्। कवेरियं भावना शपिप्पलं प्रतिश काव्ये दृश्यते। (पृ.६९)

कविर्भारतदेशे व्याप्तेन दारिद्र्यजन्यदैन्येनापि चिन्तितः संलक्ष्यते। जनेषु हतराष्ट्रभक्तिः पीडयति तम्। भाषाजातिधर्मगता विभिन्नता जनताया ऐक्यं नाशयन्ति। केचन जनाः स्वार्थजालेन बद्धाः सन्ति। कविमते वराकी मानवता विनाशगर्तं गच्छति। आतङ्कवाददानवो जनान् कवलीकरोति । धर्मान्धता विषमिव मूर्च्छयति। हिंसानलं सर्वतः प्रसरति। भारत्यर्चनप्रसंगे कविः राष्ट्रभुवः रक्षां काङ्क्षति अभिलषति च 'भूयात् सुकीर्तिः भरतावनिः वै देशेषु देदीप्यतु देश एषः।' (का. मा., पृ.४३)

'भारतगौरवम्' इति रचनायां कविर्भारतभुवं स्तुवन् इच्छति यद्राष्ट्रजनास्तपः त्यागश्रमनिरता निर्लोभा धर्माणः कर्मिणो देशप्रेम्णा पूर्णाः स्युर्येन देशः स्वाभिमानधनेन समृद्धो भूयात्। उपायान् निर्दिशन् असौ सचेतयति-

**निष्कामकर्मकर्तारो हर्तारः शत्रुसंकटम्।**
**जागृता यत्र नेतारः स्वातन्त्र्यं तत्र राजते ॥** (का.मा., पृ.४५)

देवकलीदर्शने कविः एकाम् अन्यां समस्याम् अपि अङ्कयति। स्वतन्त्राप्राप्तेः अनन्तरं सप्तदशके स्थितेऽपि देशे नैकेषु भागेषु यातायातस्य परिवहनस्य सुचारुव्यवस्था नास्ति। सरकमार्गाणां जीर्णशीणत्वात् प्रायः बसयानादिनां दुर्घटना जायन्ते। प्रतिवर्षं महती जनधनहानिर्भवति। देवकलीदेवसदनसमीपे कलकलनिनादिन्याः कलिन्दकन्यायाः परेपारं बुन्देलभूमिं यातुं तत्रत्यैर्निवासिभिर्देवकलीस्थानं समागन्तुं प्रायः महत्कष्टम् अनुभूयते स्म। केभ्यश्चित् वर्षेभ्यः प्राक् अत्र अस्थायिसेतुः (पीपों का पुल) प्रतिवर्षं निर्मीयते स्म। वर्षौ भेद्यते स्म। यातायातस्य संकीर्णे सेतुमार्गे कालिन्द्याः सैकते पुलिने बहुधा यानदुर्घटना जायन्ते स्म। स्थानीयसमस्याभिः परिचितः कविः एवम्भूतानां समस्यानां मोचनं प्रार्थयति निरातङ्क पर्यटनविकासञ्चेच्छति शिवप्रियां देवीं देवकलीं प्रति स्तवनं निवेद्य-

**न क्वापि दुर्घटना स्यात् यमुनायास्तटे वा।**
**बसयानं न गच्छेन्नु गम्भीरं यमुनाजलम् ॥**
**औरैयापावने क्षेत्रे शूरवीरभुवीह वै।**
**शेरगढे शेते प्रकृतेर्नूतनाच्छविः॥**
**जागृतिस्तु भवेन्नित्यं कलिन्दजातटे शुभे।**
**जागृता जनता भूयात् कृत्वा पर्यटनं नवम्॥** (का.मा., पृ.६८)

कविवरः भारतीये समाजे परिव्याप्तेन भ्रष्टाचारेण जनताया व्यथयापि व्यथितोऽस्ति । अयं भ्रष्टाचारपिशाचः अहर्निशं समाजोन्नतिं कवलयति। मानवः आचारविवर्जितः पारिवारिकसम्बन्धान् सामाजिकप्रतिष्ठामपि न विचारयति। वासनापङ्कपतिताः सम्बन्धानां मर्यादां न गणयन्ति। कामासक्तिपरो ह्यनुजो वाञ्छति अनुज्ञां तनुजां तनुजः। पापाचारी मद्यमत्तोऽसुर इव श्वसुरः वधूं प्रत्यासक्तः निन्दातोऽपि न बिभेति। अर्थलोलुपा ग्रामप्रधानास्त्वरया धनार्जनाय नानाः सर्वकारीया योजना निगिरन्ति। मतलाभाय लालास्राविणो नेतारः कृष्णधनार्जनलिप्ता यत्किञ्चदपि लोकविरुद्धं कर्तुं न विचारयन्ति। उत्कोचं विना कार्यालये न्यायमन्दिरे कोऽपि किमपि कार्यं कारयितुं न प्रभवति। सत्तासुखं समासादितुं सत्ताधीशानां कुत्सिताचारा नैतिकमूल्यानां सीम्नः लङ्कयन्ति। पक्षविपक्षकलहात् भ्रष्टाचारवशात् देशस्य शत्रवः सीमान्तप्रदेशेषु गर्जन्ति । अतः कविः समाजस्य सर्वेषां वर्गाणां जागरायै जागरितो यतते सुशिष्टाचारवर्धानाय, भ्रष्टाचारभञ्जनाय, सत्याचारप्रसाराय, धर्माचारवर्धनाय च। परिणामतः श्रमजीविनः श्रमिकाः, धान्यप्रसवितारः कृषकाः, बाहुबलिनः सैनिकयोद्धारः, नयबोद्धारो वाक्कीलाः, शिक्षार्थिनः शिक्षकाः स्वास्थ्यरक्षकाः चिकित्सकाः सर्वे वर्गा निजकर्त्तव्यानि प्रतिपालयन्तु-

**भ्रातः ! श्रमजीवी श्रमिकोऽसि धान्यप्रसविता त्वं श्रमिकोऽसि।**
**बाहुबली सैनिकयोद्धासि, शिक्षार्थी शिक्षकोऽसि वा त्वं,**
**स्वास्थ्यरक्षकश्चिकित्सकस्त्वम्॥**
**कर्त्तव्यपरायणतां प्रतिपालय, श्रमेण शुचिधर्मं हृदि धारय।**
**बन्धो ! वर्धय धर्माचारं, भंग्धि भो भ्रातः ! भ्रष्टाचारम् ॥**
(भंग्धि भ्रष्टाचारम्, का.मा., पृ.१२६-२७)

एतदीया सामाजिकी चेतना 'देशदशामवलोकय' नामाङ्किते पद्यबन्धेष्वपि निबद्धा द्रष्टुं शक्यते। कविः 'बन्धो देशदशामवलोकय' इति सम्बोधनेन आवर्जयति देशवासिनां चेतांसि । असौ व्याहरति- देशे सत्तालोलुपराजनीतिज्ञैर्मतलाभाय वर्गजातिधर्मभाषागतविभेदैः समाजे संघर्षः सृष्टः। वर्तमानराजनीतिः अत्याचारकुनीतिं तोषयति। दस्युवञ्चकाततायिनाम् अपराधान् पोषयति। न्यायं विक्रीणीते। विद्यालयेषु छात्रा राजनीतिनिरता विनयशौचाचारैर्हीनाः संजाताः। शिक्षका अपि ज्ञानपण्यकारिणः शोच्या जाताः। अर्थपिशाचा यौतुकज्वालायां दाहयन्ति वधूः। रक्तपायिनः श्रमशोषणनिरता दलितान् शोषयन्ति । आतङ्कवादिनो जनसंहारं कुर्वन्ति। अपरहणं, बलात्कारः कोषागारवित्तकोषलुण्ठनं नगरे नगरे क्रियते। अराजकतायाः संरक्षणत्वात् देशस्य दशा शोच्या अस्ति। कवेः अधोलिखिता पंक्तयोऽपि दुर्दशादर्शिन्यः कविचित्तगताम् आकुलतां द्योतयन्ति।

**सत्ताधीशा अन्धा बधिराः स्वार्थान्धा निर्लज्जा भ्रष्टाः।**
**बोफोर्सहवालाकाण्डे लिप्ता निर्लिप्ता इव मूका दृष्टाः॥**
**दस्युतस्कराश्रयदातारो नूनमिमे राष्ट्रसीमविक्रेतारः।**
**कृष्णधनार्जितराजश्रिया ये कृष्णमुखस्य छविं त्रातारः॥**
**एषां साधुजनानां साधो ! छविमप्यवलोकय!**
**बन्धो देशदशामवलोकय ॥** (का.मा., पृ. १२९)

दैनन्दिने वैयक्तिके सामाजिके जीवने आचारशुद्धिमिच्छन् कर्तव्यप्रतिपालनाय वचनबद्धोऽयं कल्याणकामी कविवरः राष्ट्रस्य नवनिर्माणाय आह्वयति जनान् श्रमसरित्सु अवगाहनाय पद्येनैतेन-

**श्रमशीलं जीवनमति सफलं सुखदं रयिदं शुभमतिविमलम्।**
**कार्यं कुरु प्रतिक्षणं जीवने मा भारं चिन्तय मा विफलम्।**
**श्रमसरितायां सुस्नाता ये, स्वच्छा सन्त्यकल्मषकृतिनः।**
**राष्ट्रसाधनाश्रमेण येषां श्रमवीरास्ते एव सुव्रतिनः।**
**राष्ट्ररतये श्रमगानं गेयम। श्रमगीतं सततमिह गेयम्॥ ( का.मा., पृ.125 )**

सरस्वतीस्तवने कविः नवगतिमतिदात्रीं ज्ञानगङ्गाविधात्रीं सरस्वतीं संस्तूय आतङ्क विनाशं रणभीतिशमनं शान्तिस्थापनं भारतं च भा-रतं विधातुं याचते-

**स्वभरतभुवि दृष्टः कीदृगातङ्कवादः,**
**प्रतिदिनमिह हिंसा-ताण्डवं वर्धमानः ।**
**शमयतु रणभीतिं शान्ति-सौहार्दभावः,**
**वितरतु वरदानं शारदा ज्ञानदात्री।**
**शमयतु परितापं भारती भव्यभावैः,**
**विभवमयमिदं स्यात् भारतं भा-रतं स्यात् ॥** (का.मा., पृ.९)

'पातु लोकं महेशं' स्तोत्रे कविः नराणां व्याधिराशिं संहार्य भारतस्य समृद्धिं कामयते व्योमकेशं शिवं संस्तूय-

**हरतु भव विकारं व्याधिराशिं नराणाम्,**
**दिशतु जनगणं सः ज्ञानज्योतिःस्वरूपम्।**
**भवतु भरतभूमिः भव्यभावैः समृद्धा,**
**वितरतु वरदानं विश्वपो व्योमकेशः॥** (का.मा., पृ.१९)

उपर्युक्तविवेचनेन सुस्पष्टं प्रतिभाति यत् काव्यमालायाः वैविध्यमयेषु विषयेषु सामयिकी सामाजिकी चेतना चारुतया चित्रिता कविवरस्य कैलासनाथद्विवेदिमहाभागस्य संवेदनशीलतां प्रमापयति। अत्र कविः केवलं सामाजिकराष्ट्रियसमस्यानामेव अङ्कनं न करोति प्रत्युत तासां निवारणाय सदुपायान् निर्दिशन् मार्गमपि दीपयति, दुराचारान् दुर्गुणान् हातुं च प्रेरयति। निर्वहणे कविशब्दैः प्रार्थयामि परेशं यत्-

**सर्वान् सामाजिकान् सभ्यानवत्वीशोऽष्टमूर्त्तिभिः।**
**रङ्गमञ्चे जगत्याशु जयेत् भातु च भारतम्॥** (का.मा., पृ.१८)

साभारः आन्वीक्षिकी

## मृडान्यष्टकम्



अये मातर्विश्वं सृजसि समये पासि नितरां
ततः संहारं त्वं कुरुष इति सन्तोऽजडधियः।
वदन्त्येवं सत्यं मम मनसि पृच्छा परमियं -डॉ. अरविन्दकुमारतिवारी
कुमारं भस्माङ्गं वद गजमुखं कर्षसि कुतः? १
गृहे वन्द्या देवी पतिसुतसुखं वाञ्छति सदा
तदा गेहस्थानां शुभमपि हृदा चिन्तयति या
अहो सोढ्वा सोढ्वा विपदमिह सामोदमयते
नुमस्तां देवीं त्वां गिरिवरसुतां कल्पलतिकाम् २
पिता पातीत्येवं निगदति वृथा कश्चिदपि ना
परं पासि प्रायस्त्वमिह निजसन्तानमनिशम्।
न साम्यं ते लोके कथमपि मया वीक्षितमये!
क्वचित् त्रैलोक्येऽस्मिन् बहुजननमार्गैर्विचरता। ३
अयं स्वार्थी लोक : कथयति कथां शौर्यललितां
लपन् लीलां लीनो लुलितलतिकां लालयति नो।
सुमं लब्ध्वुं मातः! सरति तव पूजार्थममभितः
भजन् भीतो भक्तो भवति भुवने भावभरितः। ४
धनं मानं लब्ध्वा स्मरति महिमानं न मनुजः
कुबेरं देवेन्द्रं मनुत इव चात्मानमधुना।
धुनोत्यापत्काले निजतनुमयं रक्षसि यदा
स्वभावो मातस्ते द्रवति जलवत्प्राणिषु तदा।। ५
सदानीरा भूत्वा निखिलपुरुषान् सिञ्चति चिरात्
परं धत्ते दुःखं गृहिसुगृहिणी केवलमलम्।
नरो नारीं त्यक्त्वा गणयति निजं कृत्यमतुलं
विदुनः सन् मातः! तव शरणमायाति विकलः।। ६
जगत्यां नारीणामतुलमवदानं बहुविधं
विजानन् ब्रूतेऽयं चतुरपुरुषो नैव मधुरम्।
द्विजिह्वो लाभार्थं नमति जगति प्रीतिवचसा
हृदार्चां ते हित्वाऽकलयति धनं धीवर इव।। ७
मृडान्येतां यात्रां विधिविरचितां मानवचितां
विजानेऽहं यात्री प्रतिपदमये कर्मकुशलः।
न वाञ्छा संसारे जननि! मम चित्ते वस परं
विना त्वां शून्यं हा जगदिदमहो साधुवचनम्।। ८
स्तवाष्टकमिदं सृष्टमरविन्देन महात्मना।
यः पठिष्यति रागेण स विरक्तो भविष्यति।। ९

---

अवाञ्छितस्थले प्रफुल्लमेकं मन्दारवृक्षं
विलोक्य समुच्छलितो भावः समर्प्यते।

## मन्दार! नहि चायकस्ते!

मन्दार! मित्र! महनीय! महानुभाव!
मायाविनो भगवतो भुवि शङ्करस्य।
ग्रीवाविभूषण! वृथा खलवाटिकायां
फुल्लो विषीदसि मुहुर्नहि चायकस्ते।। १
दूरं तवास्त्युपवनात् शिवमन्दिरम्भोः!
पादं विना कथमहो ननु यास्यसीतः!
स्नातो नृधूलिबहुवृष्टिकणैः सदोत्थः
कं प्रेक्षसे जनमये! नहि चायकस्ते।। २
चेतुं प्रयान्ति सुजना हरभक्तिमन्तः
सिद्धा बुधाः शिवशिवेतिवचोविमुग्धाः।
अस्मिन् पुरे न शिवभक्तिभरोऽपि कोऽपि
यश्चेष्यति प्रियमहो! नहि चायकस्ते।। ३
जानन्ति नैव मरुभूगृहिणो वराकाः
भूर्वर्तते सुखकरी जननीव काचित्।
या शम्भुशूलरचिता श्रय काशिकान्तां
भव्येऽग्रिमे नवयुगे नहि चायकस्ते।। ४
संसेवते कुविपिनं नगरं न वेत्तु
शक्तो वनी मृगमना न शिवं च वेत्ति।
यस्तस्य गेहसविधे जनिरस्ति मित्र!
मन्दार! किं कृतमहो! नहि चायकस्ते।। ५
आलोक्य ते सुममहं मुदितारविन्दो
नैजश्रियं द्रुतमये! विकिरामि तुभ्यम्।
धृत्वा परागकणसूक्ष्मतमं सुरूपं
शम्भोः स्पृशेः सुचरणौ नहि चायकस्ते।। ६
देवाधिदेवशिवशङ्करमन्दिरे ते
कस्मान्न वा श्रुतमहो! वद जन्मवार्तम्।
मन्ये त्रिशूलिशुभदर्शनलाभतुष्टान्
दृष्ट्वा सुखी भवसि हा! नहि चायकस्ते।। ७
मैवं विषादवनवृक्षलताप्ररोहं
तन्वन् विचिन्तय कृतं विधिना स्मर त्वम्।
भाग्येन दत्तमतुलं कुसुमं शिवस्य
मन्दार! चुम्बति शिरो नहि चायकस्ते।। ८

## अहो! कीदृशः



डॉ-शशिकान्त तिवारी शशिधर

नित्यं शीतलतां ददातु जगते नो चेच्छशी कीदृशः
कुर्याद्विश्वमिदं प्रकाशभरितं नो चेद्रविः कीदृशः।
नित्यं नो वहतात्प्रियं झरझरं वायुस्स वै कीदृशः
हन्तुं नार्हति हा!शृगालमपि चेत्सिंहो बली कीदृशः।।

सर्वं शून्यमयं न पश्यतु जगद्दिव्यो मुनिः कीदृशः
सर्वं भोगमयं न पश्यतु जगच्चेद्राक्षसः कीदृशः।
सर्वं दुःखमयं न पश्यतु जगज्ज्ञानी सखे! कीदृशः
विश्वं त्याज्यमशाश्वतं न मनुते त्यागी स वै कीदृशः।।

शिष्यं पुत्रसमं हृदा न मनुतां श्रेष्ठो गुरुः कीदृशः
सेवां संविदधातु नो निजगुरोश्शिष्यस्सखे! कीदृशः।
काव्यं नो लिखतु प्रियं नवनवं श्रेष्ठः कविः कीदृश
उक्त्वा मोहयतीह नैव जनता वक्ताद्भुतः कीदृशः।।

कान्ताप्रेमसुकल्पनाहतमतिर्नो चेद्युवा कीदृशः
नित्यं वैश्विकचाकचिक्यलसितश्चेत्साधकः कीदृशः।
नो च्छायां न फलं ददातु भुवि चेद्वृक्षस्सखे!कीदृशः
संतुष्येन्न पिपासिताञ्च धरिणीं वृष्टिस्सखे!कीदृशी।।

नित्यं दुर्जनतान्न दर्शयति चेन्ना दुर्जनः कीदृशः
नैवं चौरकलाविधाननिरतश्चौरस्स वै कीदृशः।
ब्रूयान्नैव सदा विनम्रवचनं धूर्त्तस्सखे! कीदृशः।
पीत्वा मद्यरसं चलेत्पथि तदासौ मद्यपः कीदृशः।।

---

## जनकः



डॉ विपिनकुमारद्विवेदी
फतेहपुरम्, उत्तरप्रदेशः

श्रमेण भरति परिवारं जनकः,
सदा दिशति सन्मार्गं जनकः।
गृहे सुताः सुखसहिताः स्युः,
अहर्निशं च यतते जनकः।।

धनम् अर्जयति सततं जनकः,
गृहे व्ययं च कुरुते जनकः।
शिक्षणशुल्कं दत्त्वा पाठयति,
जीवननिर्माणं कुरुते जनकः।।

विपदि वयं यदा भवामः,
दूरे कुरुते शीघ्रं जनकः।
कष्टं नहि जानाति किंचित्,
सुखं सदैव दत्ते जनकः।।

स्वयं च जीर्णं वस्त्रं धृत्वा,
नूतनवस्त्रं परिधापयति जनकः।
स्वयं न भुक्त्वा उत्तमभोज्यम्,
पूर्वम् अस्मान् खादयति जनकः।।

आपणं गच्छति यदा जनकः,
क्रीत्वा मिष्टान्नम् आनयति जनकः।
क्रीडनकं च बहुसुन्दरम्,
नीत्वा शीघ्रं वितरति जनकः।।

क्वचित् क्रोधेन तर्जयति जनकः,
पश्चात् प्रेम्णा बोधयति जनकः।
कथं च चलनीयं संसारे,
सरलेन सम्यग् ब्रूते जनकः।।

अतीव दयालुः अस्ति जनकः,
हितं सदा चिन्तयते जनकः।
जनकं विना च शून्यं सर्वम्,
शून्यं लगति परिवारः अखिलः।।

चतुर्थपुटस्य शेषभागः

## भव्याभिलाष इति....

भव्याभिलाषे गुरूणामाज्ञा ध्यतव्याख्या कविता शिष्याणां जीवनं पुष्णाति।
यथा - **उत्थातव्यं प्रातः शीघ्रं सायं शयनं करणीयम्।**
**दन्तधावनं विना कदाचिज्जलपानं नहि करणीयम्।।**
तथा- **श्रेष्ठजनानामुपदेशानं सदा पालनं करणीयम्।**
**कस्मिंश्चिद् गुरुजने चागते शीघ्रमासनं त्यजनीयम्।।**
अग्रे - **कुलं च राष्ट्रं स्वं सम्मानं भावोऽयं त्वयि सदा भवेत्।**
**येन कुलं राष्ट्रं समुज्ज्वलं सर्वश्रेष्ठं सदा लसेत्।।**
भगवान् श्रीरामः कवेः मानसे विराजते। अतएव राम! आस्से हृदस्पन्देऽहर्निशम् इति कविता मनोमोदिनी प्रतिभाति। यथा
**राम! मन्मानसे किं निलीनोऽधुना**
**मन्यते नो पुराविस्त्रमाणं विना।**
**किन्न निर्गच्छसि त्वं प्रभो! मे बहिः**
**स्तम्भमुद्भिद्य जातो यथा त्वं पुरा।।**
अग्रे-**दर्शने भारतीये बुधैर्मन्यते ह्याप्तवाक्यं प्रमाणं न शंकास्पदम्।**
**दृष्टमात्रं प्रमाणं च यैर्मन्यते तत्पितुर्नाम सत्यं कथं मन्यताम्।।**
अनेन प्रकारेण रामास्तित्वनिवारकान् प्रति इति शीर्षकेण भावप्रवणा रचना भव्याभिलाषे विलसति। नमस्ते, नौमि तां मातरं सन्ततं सादरम्। नवश्लोकिमानसम्। मामको भाति मध्यप्रदेशोऽद्भुतः। हनुमच्चत्वारिंशिका आचार्यवर्यस्य मनोहारिणी अनूदिता रचना वर्तते। यथा भगवतो हनुमतश्चालीसा वर्तते तथैव तस्या अनुवादोऽपि मनोहारी प्रतिभाति। विलोक्यतां कश्चिदंशः,
यथा - **जय हनुमत्! ज्ञानगुणसागर! जय कपीश! त्रैलोक्योज्जागर!**
**रामदूत! अतुलितबलधामा, अंजलिपुत्र! पवनसुतनामा।।**
**महावीर! विक्रमवज्राङ्गिन्! कुमतिवार! सुमतिकर! संगिन्!**
**कंचनवर्ण! विराज! सुवेश! कर्णकुण्डलः कानकेशः! इति**
अनेनैव प्रकारेण संकटमोचनाष्टकमपि मनोहरमाचार्यवर्यस्य अद्वितीयां कवित्वशक्तिमभिव्यनक्ति। विबुधवृन्दसमर्चनीयमाचार्य वासुदेवद्विवेदिशास्त्रिणं सार्वभौमसंस्कृत- प्रचार संस्थानस्य संचालकं संस्तुवन् वासुदेवाष्टकं विलिखति
यथा - **स्वसंस्कृतप्रचारणाय पुस्तकप्रकाशनैः**
**स्वसार्वभौम आलये स्वतोवदुप्रशिक्षणैः।**
**निरन्तरं प्रवासतोऽपि संस्कृतप्रचारकं**
**तमार्यवासुदेवसद्गुरुं द्विवेदिनं नुमः।।**
प्रज्ञाचक्षुष्मन्तं श्रीरामभद्राचार्यमभिलक्ष्य अनेन समीक्षेण सुकविना आचार्येण श्रीमता रहसबिहारिद्विवेदिगुरुणा श्रीरामभद्राष्टकं विरचितम्। यत्र सद्भावो दरीदृश्यते आचार्यवरस्येति। पदप्रज्ञोपनिषदिति मनोहारिणी रचना कस्य न मनोहरते। सामयिकी रचनेयं सदैव मुहुर्मुहुः पठनीया प्रतिभाति- यथा वार्त्तापत्रसम्पादक उवाच
**तव क्षेत्रे पदक्षेत्रे समवेताः पदेप्सवः।**
**सत्तापक्षा विपक्षाश्च किमकुर्वन् तद्वद।।**
वार्त्ताहर उवाच- **पदप्रज्ञं जनं ज्ञातुं भ्रमन् श्रीमन्नितस्ततः।**
**दृष्टवान् पदवन्तं तं बोधन्तं निजं दलम्।।**
अमृतं वचोऽपि लस्यादमृतोत्सवे स्वराष्ट्रे इति शीर्षकेण रचिता गीतिः मनांसि नः हरते। गीत्यन्ते आचार्यबच्चुलालप्रभृतिकवीनां श्रद्धांजलितितिरस्ति। यत्र हार्दिको दुर्लभो भावो व्यक्तीकृतो विलोक्यते। अस्त्वलमतिविस्तरेण।
अन्ते वक्तुमहं प्रभवामि यत् भारतस्य कवीनां चेतनायां राष्ट्रमेव प्रथममस्ति। कश्चिदपि कविः भारतं स्वकाव्यस्य विषयीकरोत्येवेति। पद्मश्रीरमाकान्तशुक्लमहोदयाः भाति मे भारतम् , नामकं खण्डकाव्यं विलिख्य अमरत्वं गताः। अनेके सुकवयः भारतवर्षमभिलक्ष्य यशोभाजो जाता इति जानीमो वयम्। भारतं विना न कविः, स नैव कविर्यो भारतं न स्वकाव्ये चित्रयति। अतः आचार्यो रहसबिहारिद्विवेदी महोदयः भारतमन्त्रेण जागर्ति भारतनामसंकीर्तने स्वपिति। यस्य कवेश्चित्ते एवं भारतं राजते स एव वस्तुतः कविरस्ति। एवं संक्षेपेण वक्तुमहं शक्नोमि यत् राष्ट्रिय- चेतनायाः पोषकः कविः अद्भुतभावभरितः प्रतिपदं राष्ट्रमेव संरक्षितुं प्रयतते। आचार्यो रहसबिहारिमहोदयो भारतवर्षस्य आधुनिको मुनिरिव मन्तुं शक्यते। अयं गुरुवरो भवतु शतायुरिति कामयमानो भव्याभिलाषस्य यशःसौरभमास्वादयन् भगवन्तं प्रार्थये।


## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे डॉ अम्बेडकरजयन्तीसमारोहः

**भोपाल।** भारतसर्वकारस्य शिक्षामन्त्रालयेन सञ्चालिते केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे अप्रैल मासस्य पञ्चदशदिनाङ्के डॉ भीमराव अंबेडकरमहोदयस्य जन्मदिवसोपलक्ष्ये अन्तर्जालमाध्यमेन अम्बेडकर



जयन्तीसमारोहस्याऽयोजनमभवत्। समारोहोऽयं कुलपतीनां प्रो. श्रीनिवासवरखेडी महोदयाना माध्यक्षे, जवाहरलालनेहरूविश्वविद्यालयस्य आचार्याः प्रो. सुधीरकुमारमहोदयानां मुख्याऽतिथित्वे, कार्यवाहक परिसरनिदेशकानां प्रो. सुवोधशर्ममहोदयानां संयोजकत्वे, तथैव परिसरीयाणां समेषामध्यापकानां कर्मचारिणां छात्राणाञ्चोपस्थितौ अपराह्णे त्रिवादनतः परिसरस्य सभागारे प्रारम्भो जातः। कार्यक्रमेऽस्मिन् नहि मात्र तत्तद्परिसरीयाः निदेशकाः आचार्याः छात्राः संयुक्ताः आसन्, अपितु केन्द्रीयसंस्कृत विश्विद्यालयस्य सम्बद्धाः समेऽपि आदर्शविद्यालयानाम्, प्राचार्याः अध्यापकाः छात्राश्चाऽपि सम्मिलिताः। समारोहेऽस्मिन् अतिथिसु मुख्यातिथित्वेनोपस्थिताः प्रो. सुधीरकुमारमहोदयैः भीमराव अंबेडकरमहोदयस्य शिक्षाप्राप्तिविषये समागातानां समस्यानामुद्धरणपूर्वकं वह्वी चर्चा चर्चिता। भीमराव अंबेडकरमहोदयस्य शिक्षा कुत्र कुत्र जातेत्यपि प्रतिपादितम्। जनानां कृते कीदृशः समाजः सर्जतस्तैरिति विषयः महतारम्भेणोपस्थापितः। भीमराव अंबेडकरमहोदयेन समेषां कृते समानाधिकारप्राप्तये समाजे प्रचलितभेदभावाऽवसानाय कृतः प्रयासः अस्माकं कृते स्मरणीयः। तैः संस्कृतभाषाया उद्घोषः कृतः, तद्विकासाय च अकुटिलो मार्गः प्रसस्तः।

कार्यक्रमस्याऽध्यक्षाः प्रो. श्रीनिवास वरखेडीमहोदयाः उक्तवन्तः यदद्य भारतदेशः यया व्यवस्थया प्रगतिं करोति, उत्तरोत्तरञ्च वर्धते सा व्यवस्था संविधानाऽधारिता वर्तते। इयं संवैधानिकी व्यवस्था भीमराव अंबेडकरमहोदयेन दत्ता। भारतस्य संविधानं विश्वप्रसिद्धम्। कार्यक्रमस्य संयोजकः प्रो. एल नारायण सिंम्हा आसीत्। सञ्चालनञ्च सुनीता कृतवती।

# संस्कृतस्य शास्त्रीयलौकिकस्वरूपयोः च अध्ययनस्य आवश्यकता विद्यते- आचार्यः विजयकुमारः सीजी

डॉ.दिनेशः चौबे, उज्जयिनी

उज्जयिनीस्थस्यमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य संस्कृतशिक्षणप्रशिक्षणज्ञान विज्ञानसंवर्धनकेन्द्रम् एवञ्च भारतीयभाषासमितिः, नवदेहली इत्यनयोः संयुक्ततत्त्वावधाने दिनाङ्क



- 08 अप्रैल 2024 तमे दिनाङ्के श्रीमहाकालेश्वर वैदिकशोधप्रशिक्षणसंस्थानम्, चिंतामनगणेशमार्गः उज्जयिन्याम् एकदिवसीया सरलमानकसंस्कृतराष्ट्रीय कार्यशालायाः आयोजनम् अभवत्। प्रातः10:30 वादने कार्यशालायाः उद्घाटनसत्रे विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः विजयकुमारसीजीमहोदयः अध्यक्षरूपेण उपस्थितः आसीत्। । महोदयेन स्वउद्बोधने उक्तं यत् संस्कृतस्य सरलमानकस्वरूपस्य शास्त्रीयपरिनिष्ठितस्वरूपस्य च प्रयोगस्य आवश्यकता वर्तते । सरलसंस्कृतमाध्यमेन वयं संस्कृतस्य प्रभावः पुनः लोके प्रतिष्ठापयितुं शक्नुमः । कार्यशालायाः संयोजकेन केंद्रनिदेशकेन च डॉ. अखिलेश कुमारद्विवेदीमहोदयेन प्रस्तावना कार्ययोजना च प्रस्तुता।

श्रीमहाकालेश्वरवैदिकशोध प्रशिक्षणसंस्थानस्य निदेशकेन डॉ. पीयूषत्रिपाठिवर्येण वाचिकस्वागतं संस्कृतसंवर्द्धन विषयकम् उपायान च प्रस्तुतम् । कार्यशालायां पृथक् पृथक् सत्रस्य आयोजनं जातम् आसीत्। विषयविशेषज्ञैः संस्कृतस्य प्रभावः उपयोगिता च विषये उद्बोधितम्।

उद्घाटनसमापनसत्रस्य संचालनं, समन्वयकेन डॉ. दिनेशचौबेमहोदयेन आभारज्ञापनञ्च डॉ. रमेशशुक्लवर्येण ,प्राध्यापकेन श्रीमहाकालेश्वरवैदिकशोध संस्थानेन कृतम्। कार्यशालायां डॉ.राजेशमंडलः श्रीअपूर्वपौराणिकः छात्राः- शोधच्छात्राः , संस्कृतशिक्षकाः च सम्मिलिताः अभवन् । कल्याणमन्त्रेण सह कार्यशालायाः समारोपः अभूत्।

# नवगठितप्रबन्धतन्त्रस्य शपथग्रहणसमारोहः सम्पन्नः

04/04/2024 तमे दिनांके पूर्वाह्णे पार्वती आर्य कन्या संस्कृत इंटर विद्यालयस्य सभागारे राष्ट्रस्य चरित्रनिर्माणपूर्वकं विद्यालय नाम्नैव संयोज्यः वर्तते। परम संघर्षशीला प्रबन्धिका डॉ.प्रतिभा मिश्रा स्वीये स्वे सम्बोधने कथितवान् यत् विद्यालयम्




नारीशक्तिं सुदृढ़ां शिक्षितां च कर्तुं समर्पित गतिशील एवं चिंतनशील नवगठित प्रबन्धतन्त्रस्य गोष्ठी माननीय अध्यक्ष सर्वश्री सर्वेश पाठकस्य अध्यक्षतायाम् आयोजिता यत्र विद्यालय परिवारेण सह समितिः वेद मन्त्रैः सहित ईश वन्दनां राष्ट्र रक्षा यज्ञं च सम्पाद्य अग्नि देवस्य समक्षं विद्यालयस्य वर्धमानपदानां सहायकः सत्य निष्ठा संकल्पः सिद्धस्स्यादिति शपथवचनं स्वीकृतम् स परस्परं परिचयात्मक वार्तया सह कोषाध्यक्षः मो.खिजर अहमदः कथितवान् यत् राष्ट्रोन्नतौ सत्य न्याय प्रियता दायित्वबोधः च व्यक्तेः पुरुषार्थः तं आकाश गंगां यावत् प्रापयितुं सर्वदा सहायकः भवति । आचार्य राधेश्याम अवस्थी बालिकाशिक्षां प्रति प्रकाशं क्षिपन् उक्तवान् यत् संस्काराणाम् आधारशिला संस्कृत भाषा यद् उच्च शिखरे पापयितुं पठन-पाठने आमूल नवाचाराणां सुरेश गुप्त कथितवान् यद् विद्यालयोन्नतौ अवरोधः न स्यात् तत्र कंकणावरोध दृष्टि गोचरो भवति चेत् तत् समाधातुं प्रतिक्षणं समर्पितास्ति । अध्यक्ष श्री सर्वेश पाठकः सर्वान् आत्मनि समाहृत्य विद्यालयः अस्मदेकं राष्ट्रिय परिवारः इत्युक्तवान्। प्रधानाचार्या श्रीमती अमिता आलोकः प्रोक्तवती सहजस्मितया सरल भावेन कथितवती यत् वयं सर्वे विद्यालय रूपी परिवारस्य सदस्याः। तत्र श्रीमती शरद अरोड़ा, श्री हरद्वारी लाल शर्मा, श्री आर्येन्द्र सिंहः, श्री अमितेश पाठकः , हिंदी वरिष्ठ प्रवक्ता श्रीमती नीलम आर्या तथा श्रीमती गीतांजलि उपस्थिता। अंते शांति पाठेन सहितं सर्वेभ्यः आभारः धन्यवादश्च ज्ञापितः।




अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।